No. १२६६

Title अनुमान प्रामाण्य स्थापनम्

Author ×

Extent १४ Age ×

Subject न्याय शास्त्रं

अनुमान प्रामाण्य स्थापनम्

१२६६

श्री॥लिंगपरामर्शानंतरं विलक्षणानुमित्यात्मकप्रमित्युदयात्, तत्कारणतया तस्य प्रमाणांतरता स एवानुमानमित्यभिधीयते: अथ वह्निव्याप्य
धूमवान्पर्वत इत्यादिपरामर्शानंतरं तदात्मकविशेषदर्शनस्थले कपर्वतो वह्निमानित्याद्याकारकप्रत्यक्षनिर्णयादेव वह्न्यादिगोचरप्रवृत्त्याद्युपप
त्तेरनुमित्यात्मकविलक्षणप्रमितिरेवासिद्धा कुतो लिंगज्ञानस्य प्रमाणांतरता· नच वह्न्यादिसंन्निकर्षं विना तद्गोचरप्रत्यक्षासंभवात् प्रत्यक्षविषयता
याः संन्निकर्षाश्रयत्वव्याप्यत्वात्, अनुमित्यात्मकप्रमित्यंतरस्वीकार आवश्यक इति वाच्यं परामर्शघटितानुमितिसामग्रीकाले साध्यादिभासकज्ञा
नसंन्निकर्षस्यावश्यकत्वात्। नचेतरव्यापकीभूताभाववत्प्रतियोगिपृथिवीत्ववती पृथिवी इत्याकारकाप्रसिद्धसाध्यकपरामर्शदशायां इतरभेदादिरू
पसाध्यभासकज्ञानानैयत्यात् तादृशपरामर्शात्मानुमित्यंतरस्वीकार आवश्यक इति वाच्यं· तादृशपरामर्शदशायामितरभेदादिविषयकज्ञानानैयत्येवि
तद्धत्त्वभाववत्त्वादिसामान्यधर्मज्ञानावश्यंभावात् सामान्यलक्षणासन्निकर्षादेवेतरभेदादिगोचरप्रत्यक्षसंभवादिति चेन्न· अस्ति हि अनुमिनोमीत्या
कारकलिंगपरामर्शानंतरोत्पन्नप्रमितिविषयकसर्वजनीनानुव्यवसायसाक्षिकोऽनुरपक्षयोऽनुमितित्वाख्यजातिविशेषः तदवच्छिन्नकारणतया

चाक्षुमानस्य प्रमाणान्तरत्वमप्याहतमेव । अथानुमितित्वजातिसत्त्वेपि न व्यंजको विधेयताख्यः साध्यादिनिष्ठविषयताविशेषोऽवश्यमभ्युपगंत
१ व्यः पदभावात् वह्निमान्पर्वतो घटवान्नेत्याकारकानुमित्यनंतरं न वह्निमनुमिनोमीत्याकारकोनुव्यवसायः एवं चोक्तानुव्यवसायस्य तादृशविष
यताविशेषविषयत्वेनैवोपपत्तौ जातिविशेषाकल्पनेन तत्त्वमेवासिद्धमिति चेन्मास्तु तादृशानुव्यवसायादनुमितित्वाख्यजातिविशेषसिद्धिस्तथापि ता
दृशविषयताविशेषनियामकतया ॰परामर्शादिहेतुतायामावश्यकत्वान्नस्य प्रमाणान्तरतानिष्प्रत्यूहैव । न च क्लृप्तक्लृप्ततादृशानुव्यवसायस्य
जातिविशेषाकल्पनेन तत्त्वोपगमेऽप्यावश्यकः अन्यथाविधेयत्वाख्यविषयतायामप्यापत्त्यात्मकप्रत्यक्षेऽशाहार्यबोधादिसाधारणतया तदनंतरमपि तथा
विधानुव्यवसायापत्तेः न ह्यनुमितौ आपत्तिशाब्दादिसाधारणो विषयताविशेषः प्रामाणिकः न चापत्त्यादिसाधारणविषयताविशेषस्यातिप्रसक्ततयाऽ राम
नुमितित्वव्यंजकत्वासंभवेन तद्व्यावृत्तो विषयताविशेषोऽनुमितित्वजातिमंगीकुर्वताऽवश्यमंगीकार्य इति वाच्यं व्यंजकातिप्रसक्तेरदोषत्वात् तथा आप १
त्त्यादिसाधारणविधेयताया एवानुमितित्वव्यंजकतासंभवात् आपत्त्यादौ व्यंजकसत्त्वेप्यनुमितित्वरूपविषयासत्त्वेनैव तादृशानुव्यवसाया

पारद्नासंभवादिति: पन्नुपरामर्शजन्यत्वं जन्यतासंबंधेन परामर्शवित्त्वमेव तादृशानुव्यवसायविषय इति पंक्ति शाब्दबोधानंतरं तथाविधानुव्यवसायापत्तिरित्यनुम
नुमितित्वजात्यैतिनदूषितन्नष्टेयं अनुमितित्वजात्यभावे परामर्शानंतरोत्पन्नापत्तिशाब्दबोधादिसाधारणानुरूजन्यतावच्छेदकस्यैव निर्वक्तुमशक्यत्वात् · अन्यथा हेतो
न्नरत्वसंबंधेन परामर्शवित्वादेस्तन्मात्राधारण्यात् · जन्यतावच्छेदकस्य तत्साधारणपेकाकृतिरिति चेन्नथा सति जन्यतावच्छेदकस्य जन्यत्वानतिप्रसंगसंपादनाय जन्यतोपा
१ अपितत्रावश्यं स्वीकरणीयतया तदनंतरं गादृशानुव्यवसायापत्तिस्तदवस्थैव तस्मादनुमितित्वं जातिः तदवच्छिन्नकारणतया लिंगज्ञानस्य प्रमाणांतरतानिष्पत्तस्तु हैव।
अत्र वदंति · चाक्षुषत्वादिवदनुमितित्वमपि प्रत्यक्षत्वव्याप्यजातिरेवमनुतद्विरुद्धं तथा च तस्वच्छिन्नकरणस्य न प्रमाणांतरताप्रत्यक्षप्रमाण एवांत
र्भावात् · न चानुमितौ प्रत्यक्षत्वसत्वे मानाभावः अनुमित्यनंतरं प्रत्यक्षत्वजात्यवलीढविनः साक्षात्करोमीत्यनुव्यवसायस्य विरहात् अनुमानस्य चानुकूलतर्कविरहे
णाप्रयोजकत्वादिति कुतोऽनुमितित्वस्य प्रत्यक्षत्वव्याप्यजातिता यतः अनुमितित्वस्य प्रत्यक्षविरुद्धत्वे अनुमितिसामग्रीकाले ज्ञानसन्निकर्षकाले ज्ञानसान्नि
कर्षादिघटितसामग्रीवलात् प्रत्यक्षापत्तिवारणाय प्रत्यक्षं प्रत्यनुमितिसामग्र्याः प्रतिबंधकत्वमावश्यकं अनुमितित्वस्य प्रत्यक्षत्वव्याप्यत्वे च तदानीमनुमित्या

त्मकप्रत्यक्षस्यैवोत्पादेन तादृशजातिविशिष्टप्रतिबंधकभावो न कल्प्यत इत्येतादृशलाघवरूपानुकूलतर्कसत्त्वात् मनुमानमेवानुमितौ प्रत्यक्षत्वसाधकप्रमा
२ णमिति: तत्र विचारसहं। तथाहि। अनुमितित्वस्य प्रत्यक्षत्वव्याप्यत्वे वह्न्यनुमित्वादि विरुद्धं तद्वश्यं वाच्यं। अनुमितिसामग्रीकाले विशेष्ये लौकिकसन्निकर्षादि
शादित वह्न्यनुमित्वादिसामग्र्या अवश्यकतया वह्न्यनुमित्वादिव्याप्यत्वासंभवात् व्यापकतायाः सुदूरपराहतत्वात् व्याप्यव्यापकभावविरहे संकरस्य येन सामानाधिक
रण्यासंभवात्। एवं वह्न्यनुमितिसामग्रीकाले वह्न्युपादित्सारण्याय तत्र तयोः प्रतिबंधकत्वमुभयवादिसिद्धमेव प्रत्यक्षत्वावच्छिन्नं प्रति तत्प्रतिबंधकत्वकल्पनं तु नक
स्यापि विशेषप्रतिबध्यप्रतिबंधकभावेनैवोपपत्तेः। एवं च किमक कल्पनप्रयुक्तलाघवं व्याप्यमते। अथानुमितित्वस्य वह्न्यनुमित्वादिना व्याप्यव्यापकंभावानुपपत्त्याव ना
पिमानसत्वाप्यैवं व्याप्तत्वमुपपद्यत एव अनुमितिसामग्रीकाले ज्ञानप्रत्यासत्तिघटिताया मानससामग्र्या आवश्यकत्वादिति मानसत्वावच्छिन्नं प्रति अनुमितिसामग्र्याः राम
प्रतिबंधकत्वाकल्पनप्रयुक्तलाघवमनुमानमेव। न च पर्वतो वह्निव्याप्यवानित्येतादृशपरामर्शजन्यानुमितौ घटादिविषयतायाः अनुभवविरुद्धतया घटा २
दिमानसेच्छाधीनानुमितिसामग्र्याः प्रतिबंधकत्वमुभयवादिसिद्धमेवेति वह्न्यादिमानसे तस्याः विरोधित्वांतरं विरुद्धमते विना सिद्धार्दिमानसस्य लौप्र

तिबंधकप्रतिबंधकाभावे विषयमनिवेश्य सर्वसाधारणमानसत्वस्य प्रतिबध्यतावच्छेदकत्वोपगमात् तत एवोपपत्तेरिति लाघवावकाश इति वाच्यं । घट
मानसं जायतामित्याकारकेच्छानां विशिष्योत्तेजकत्वानुरोधात् घटमानसत्वादेरेव प्रतिबध्यतावच्छेदकताया आवश्यकतया घटादिमानसस्येती
यप्रतिबंधकतया वह्निमानसादिवारणसंभवेन तत्र प्रतिबंधकत्वांतरस्यावश्यकत्वादिति चेन्न । भिन्नविषयकचाक्षुषादिसामग्रीकाले मानससाम
प ग्र्याऽभावादनुमितिसामग्र्याश्च तदानीमपि सत्वात् अनुमितित्वस्य मानसत्वव्याप्तापात्त्र्यप्रसिद्धेः । तादृशचाक्षुषादिसामग्रीकाले मानससामग्र्या
असत्वं च मानसं प्रति तादृशसामग्र्याः प्रतिबंधकत्वात्तदभावरूपकारणसत्वेन ग्नव मानसत्वावच्छिन्नं प्रति तादृशसामग्रीप्रतिबंधकत्वमेवासि
द्धमिति वाच्यं । तादृशप्रतिबंधकत्वाकल्पने भिन्नविषयकचाक्षुषाद्युत्पादकाले अनुमित्यसमानक्षापत्तेः । न चैवमनुमित्यस्य मानसत्वस्यैव तत्प्रति
बध्यतावच्छेदकत्वमुपेयतेऽतस्तदानीं मानससामान्यसामग्र्यानुत्तेवेति वाच्यं । अनुमित्यविरोधिनीनां तत्सामग्रीणां प्रतिबध्यतावच्छेदककोटौ अ(
नुमित्यन्यत्वस्याधिकस्य निवेशे महागौरवात् । अनुमितिसमानसत्व[illegible]स्य तादृशसामग्र्यभावजन्यतावच्छेदकत्वेन हत्वादनुमित्युत्पादवै

कालेऽनुमित्स्यसमानसत्त्वावच्छिन्नापत्तिवारणाय तदवच्छिन्नत्वं प्रति अनुमितिसामग्र्याः प्रतिबंधकताया आवश्यकतयाऽपदर्शितत्वाल्लाघवासंभवा
२ च्च· यत्तु अनुमितित्वस्य मानसत्वव्याप्यत्वमते अनुमितिमानसयोर्भयविरोधिनीनां समानविषयकलौकिकप्रत्यक्षशाब्दबोधादिसामग्रीणां प्रति
3 बध्यतावच्छेदकमनुभयसाधारणं मानसत्वमेव विरुद्धमते वाऽनुमितित्वं मानसत्वं च द्वयमिति अनुमितित्वव्याप्यमते लाघवमनुसृत्यमेवेति· तदपि न अ
नुमितित्वप्रकारकेच्छामानसत्वप्रकारकेच्छयोः पृथक् पृथक् उत्तेजकत्वानुरोधेन व्याप्यमते विप्रतिवध्यप्रतिबंधकभावद्वयस्यावश्यकत्वात्·
तादृशेच्छाभावद्वयमेकत्र निवेश्य एकमात्रप्रतिबंधकत्वकल्पनेऽनुमितित्वप्रकारकेच्छाकालेऽसत्यां वाऽनुमितिसामग्र्यां सत्यां चोक्तविरोधिसाम
ग्र्यां मनुमित्स्यसमानसापत्तेः· अनुमित्सायां सत्यां चानुमितिसामग्रीविशिष्टाया उत्तेजकत्वे महागौरवात् परं तु व्याप्यमते मानसत्वप्रकारकेच्छाविरह राम
विशिष्टतादृशसामग्र्यभावस्य जन्यतावच्छेदकमनुमित्स्यसमानसत्त्वं वाच्यं· मानसत्वमात्रस्य तथात्वेऽनुमितित्वप्रकारकेच्छाधीनानुमितेरप्य २
पि वारणादिति विपरीतमेव गौरवं· अथ सर्वत्रैवानुमित्स्यसमानसे ज्ञानादिभानमावश्यकमुपनायकज्ञानादेर्मानसपूर्वमावश्यकत्वात् द्विव

वह्न्यादि

न यसत्त्वेव ज्ञानादिमानेऽप्यधिकाव्यपेक्षणात् इत्थं चानिरवच्छिन्नमेवानुमितित्वमन्यथा मानसज्ञानाद्यंशे विषयितासंबंधेन वह्न्यादिविशेष्यकत्वं भविष्यतीति
ज्ञानादिलौकिकविषयितानिरूपितवह्न्यादिविषयताशालिमानसत्वावच्छिन्नं प्रति तादृशविषयिताप्रकारकमानसेच्छाविरहविशिष्टविरोधि
सामग्र्याः प्रतिबंधकतयैवोपपन्ने ज्ञानादिलौकिकविषयतामनिवेश्य पर्वतो वह्निमानित्यादिमानसे विरोधिसामग्र्याः प्रतिबंधकत्वमेव नास्ति कीदृशप्र
तिबध्यतावच्छेदककोटौ अनुमितिभिन्नत्वनिवेशाधिक्यं उक्तं प्रतिबध्यप्रतिबंधकभावे ज्ञानादिलौकिकविषयितानिवेशादेवानुमितावपि वारणाभावात् तादृशवह्नि च
मानसत्वावच्छिन्नं प्रति वह्न्यादिविषयत्वप्रकारकमानसेच्छाविरहविशिष्टविरोधिसामग्रीत्वादिना प्रतिबंधकत्वकल्पनेनाप्युपपत्तेः ज्ञानादिलौकिकविषयतानि
वेशस्योपदर्शितप्रतिबध्यप्रतिबंधकभावद्वयेऽपि व्यर्थत्वादित्यत आह इच्छालौकिकविषयितानिरूपितवह्निविषयताशालिमानसं जायतामित्येतादृशेच्छाकाले तादृशविषयता
शालिमानससामग्र्यसत्त्वे समानविषयविरोधिसामग्र्यां वह्निमहं जानामीत्येतादृशमानसवारणाय विशेष्यरूपेणोपदर्शितेच्छासत्त्वे ज्ञानादिलौकिकवि
षयितावत्प्रतिबध्यतावच्छेदककोटौ निवेश्य प्रतिबंधकत्वकल्पनस्यावश्यकत्वात् ज्ञानं न वह्नीयमिति साध्याकारकविषयतासंबंधावच्छिन्नप्रतियोगिताकव

अ॰ प्रा॰

निरूपितवह्न्यादिविषयता १

त्वाद्यभावावगाहित्वाघटत्वादिदशायां विषयितया ज्ञानाद्यंशे वह्न्यादिमानासंभवात्तत्रैव ज्ञानादिलौकिकविषयविताऽऽधूम्यमावेन संप्रसिद्धमिति तद्दोषे
४ नकज्ञानीयप्रतिबध्यप्रतिबंधकभावएवानुमित्यन्यत्वानिवेशासिध्यापित्यविनाशंकनीयं· यतस्तत्र ज्ञानांशे वह्निमानासंभवेपि वह्न्यभावादिमानेबाधकाभावे
नज्ञानीयलौकिकविषयितानिरूपितवह्न्यभावादिविषयिताशालित्वरूपतादृशवह्न्यत्वादिविषयिताप्रकारकमानसेच्छाविरहविशिष्टविरोधिसामग्रीप्र
५ तिबध्यतावच्छेदकाक्रान्ततया ज्ञानादिलौकिकविषयितामनिवेश्य प्रतिबध्यप्रतिबंधकभावांतरकल्पने तु विनैवोपपत्तिः· परं तु वह्निविषयिताशालिमानसं जाय
तामित्याकारतादृशेच्छाकाले विरोधिसामग्रीसत्त्वे ज्ञानाद्यविषयकस्य वह्न्यादिमानसस्य प्रसिद्धिः तत्र ज्ञानादिलौकिकविषयितानिरूपितवह्न्यादिविष
ज्ञा यिताप्रकारकमानसेच्छाविरहेण ज्ञानादिमानासंभवादिति तदपि न· तथा हि· तादृशेच्छानां ज्ञानादिलौकिकविषयितानिरूपितत्वावच्छिन्नवह्न्यादि राम
विषयितात्वप्रकारकेच्छात्वेन नोत्तेजकता ज्ञानीयलौकिकविषयितानिरूपितवह्निविषयिताशालीच्छात्वेन लौकिकविषयितानिरूपितवह्निवि ४
विषयितावन्मानसं जायतामित्येवं तादृशेच्छाया अव्यवारणात्· किं तु ज्ञानेतरलौकिकविषयितानिरूपितत्वावच्छिन्नविषयितात्वप्रकारकत्वानिरूपितव

क्रिविषयपित्वप्रकारतानिरूपितमानसनिष्ठविशेष्यताकेच्छात्वेन· तद्वद्वह्निविषयकमानसं जायतामित्येतादृशेच्छासाधारणमपीति तद्बलादपि ज्ञा
नादिमानसंभवइति· यत्तुसुखस्यानंतरं विनश्यदवस्थसंन्निकर्षात्तद्वत्त्वस्यादिनिर्विकल्पकंतन्मूलकवत्त्वाद्युपनीतभाने ज्ञानादिभानासंभवः योग्यप
ज्ञानादीनांप्रागसत्त्वात् निर्विकल्पकं स्यातीन्द्रियत्वादितितदपिन· तदानीं मुपनीतभानस्याप्रामाणिकत्वात्·न च निर्विकल्पकज्ञानघ
टितसामग्र्येवतत्रमानमितिवाच्यं· ज्ञानाद्यविषयकमानसोपगमे ज्ञानादिभासकसामग्र्याईपितत्सामग्रीघटकतया तदभावेन सामग्र्या एवासि
द्धेः· वक्ष्यमाणतत्तद्वत्त्वाद्युपनीतभानोपगमे कृतिविरहः· तथाहि· तत्रविशेष्यतावच्छेदकप्रकारकज्ञानादिविरहेणानिर्द्धर्मितावच्छेदकमेव वत्त्वादि
मानसंभविष्यति तत्स्थले ज्ञायतेतिवत्प्रतिबंधकमात्रैव निर्द्धर्मितावच्छेदकत्वंमतिवत्थनावच्छेदककोटावपि निवेशनीयं· अन्यथापर्वतत्वावच्छिन्न
विशेष्यकमानसंजायतामित्याद्याकारकेच्छाधीनमानसेव्यभिचारात्· तादृशेच्छासत्त्वे पर्वतत्वावच्छिन्नविशेष्यकज्ञानजनकीभूतपर्वतत्वादिप्र
कारकज्ञानासत्त्वेविरोधिसामग्रीदशायां निर्द्धर्मितावच्छेदककवत्त्वादिमानसवारणाय निर्द्धर्मितावच्छेदककमानसस्येच्छाप्रतिबंधकताया ता

दृशे व्याप्त्याद्यन्तरूपे लौवे व्याप्यायाः उत्तेजकत्वस्योपगंतव्यत्वात्. तथा वानुमितौ धर्मितावच्छेदकमानसस्यावश्यकतया व्याप्तिवाराभावेन तदनुरोधा

५ त्तानुमित्यव्यत्वानिवे[illegible]शनेस्य धर्मितावच्छेदकमानसे च ज्ञानादिमानसस्यावश्यकतया तत्र ज्ञानादेर्लौकिकविषयितामानिवेशप्रतिबध्य

5 प्रतिबंधकभावकल्पनमेव नास्तीति चेदस्तामेतादृशरीत्याऽनुमित्यव्यत्वानिवेशप्रयुक्तगौरवपरीहारः तथापि मानसत्वव्याप्यमतीनिर्मुक्तिक

मेवलाघवविरहात् [illegible] अनुमित्सिकाले ज्ञानादिलौकिकविषयताशालिवस्त्वादिमानसवारणाय तादृशमानसेऽनुमितिसामग्रीप्रतिबंधकताया उ

भयवादिसिद्धत्वात् ज्ञानादिलौकिकविषयतामनिवेश्य विरुद्धव्यादिनापि तादृशसामग्र्यंतराकल्पनात् तन्मतेपि ज्ञानाद्यविषयकमानसानव

गमे कृतिविरहात्. यत्तु यत्र समानविषयकलौकिकप्रत्यक्षादिसामग्रीकालेऽनुमित्साविरहात् अनुमितिः कदापि न जायते तत्रानुमित्साया उत्ते रा म

जकत्वाभावात् अनुमितिमानससाधारणतद्विषयकमानसत्वं प्रतिबध्यतावच्छेदकीकृत्य तादृशसामग्र्याः एकप्रतिबंधकतयैवोपपत्तिर्व्याप्यम ५

तेविरुद्धमतेनुऽनुमितित्वमानसत्वयोः प्रतिबध्यतावच्छेदकतया प्रतिबंधकताद्वयमिति व्याप्यमनेलाघवमनुसमेवेति न दृष्यनादेयमेववि

रूढमते विधिविषयविशेषेणाघवसंभवात् तथाहि· यादृशविषये समानविषयकवाद्युक्तादिसामग्रीकालेऽनुमित्यसमानसंभजातं प्रवित्वं नुमितिरेव तत्र विरो
धिसामग्र्याः प्रतिवध्यतावच्छेदकं प्राप्यमतेऽनुमितित्वं मानसत्वं वेत्यत्र विनिगमनाविरहात् प्रतिवंधकताद्वयं विरुद्धमतेऽनुमानसत्वस्यासंग्राहकतयाऽनु
नि मितित्वमेकमेव प्रतिवध्यतावच्छेदकमितिलाघवमिति· वस्तुतस्तु अनुमित्यसत्वनिवेशनप्रयुक्तगौरवपरिहारो यश स्यः· तथाहि· विरोधिसामग्रीका
ले पर्वतविषयिताभिन्नविषयवन्हिविषयिताशालि मानसं ज्ञायतामित्याकारकेच्छासत्वे वन्हेः पर्वतस्य च विषयकतितज्ञानसत्वे ज्ञानांशे वन्हिविशेषणकं मानसं
न संभवति तादृशमानसस्य तादृशीयविरोधिसामग्रीप्रतिवंधकृतापाततदिच्छाया दृष्टत्वरूपे तौ वेच्छायाउत्तेजकत्वस्योपगंतव्यत्वात्· अन्यथा तादृशेच्छाकालेऽप
र्वतभासकज्ञानाद्यसत्वे वन्हिं जानामीत्येवादृशमानसस्य विरोधिसामग्री दृशायामापत्तेः· नाविज्ञानांशे वन्हिविशिष्टपर्वतवैशिष्ट्यावगाहिमानसं तत्र संभव
ति तत्र वन्हिमान्पर्वत इत्येतादृशविशेषणतावच्छेदकप्रकारकनिर्णयस्यापेक्षितत्वात् केवलं विशेष्ये विशेषणमितिरीत्या वन्हिमत्पर्वतं जानामीत्ये स
तादृशवोधस्यानंगीकर्तुं शक्यते विषयांशे विशिष्टवैशिष्ट्यावगाहिज्ञानादिप्रसंगस्यानभ्युपगमात्· एवं तत्र वन्हिविशेषितपर्वतविशेषणकज्ञान

दीं॰ना॰

६ मानसमपि ममम विनसंभवतितादृशमानसस्थलीयविरोधिसामग्रीप्रतिबंधकतायामविउपदर्शितेछायामनुत्रेजकत्वात्।तथात्वेविरोधिसामग्री
दशायांतादृशेछासत्त्वेवह्निमानसकतत्स्तानाघसत्त्वेपर्वतंजानामीत्यादिमानसप्रसंगात्·तस्मान्नचकथंचिदपिज्ञानमानासंभवात्पर्वतोवह्निमा
6 ना नित्याद्याकारकंज्ञानाद्यविषयकमेवमानसंतदुत्तरोत्पन्नज्ञानादिविषयतामनिवेश्यसामग्र्याःप्रतिबंधकत्वांतरंचोपगंतव्यमितितत्रैवानुमितिपक्षत्वनिवेश ना
नमावश्यकंव्याप्यमतेन्यथानुमितौव्यभिचारात्·अत्रोच्यते·अनुमितित्वसमानसत्त्वव्याप्यत्वेभिन्नविषयकत्वाकुंठादिसामग्रीप्रतिबंध
तावच्छेदककोटौअनुमित्यन्यत्वनिवेशाधिक्यात्प्रकारांतरेणलाघवासंभवाज्ञानानुमितित्वंमानसत्वविरुद्धमेवास्तांप्रत्यक्षत्वव्याप्यत्वंतुतस्यनिरावा
धंकिंसहत्व·तथाहिअनुमितौप्रत्यक्षत्वोपगमेअनुमितौविशेषणतावच्छेदकप्रकारकज्ञानादीनांस्वातंत्र्येणहेतुतानकल्प्यतेप्रत्यक्षस्थलीयतः ज्ञानस्य हे
तावच्छेदकस्यविशिष्टवैशिष्ट्यावगाहिप्रत्यक्षत्वस्यानुमितावविसत्त्वात्तत्स्थलीयहेतुतयैवोपपन्नेः विरुद्धमेतत्तत्रहेतुत्वांतरकल्पनमावश्यकंनच राम
प्रत्यक्षानुमितिसाधारणस्यविशिष्टवैशिष्ट्यानुभवत्वस्यैवतज्ज्ञानतावच्छेदकत्वोपगमात्विरुद्धमतेप्येकहेतुतावोपपत्तिरितिवाच्यं·प्रत्यक्षत्वातिरिक्तायामनुभ ६

वत्वजातौमानाभावात्‌। विशिष्टवैशिष्ट्यावगाहिज्ञानत्वस्य च तथात्वं न संभवति। तथाविधस्मरणे व्यभिचारात्‌। यादृशविशेष्ये विशेषणमित्यादिन्यायेनै
१ तद्वयसंस्कृतिरूपस्य घटेत्वस्याभ्युपगम्यते तथापि नित्यसाधारणतया तस्य च तथात्वासंभवः। न च विशिष्टवैशिष्ट्यावगाहिप्रत्यक्षत्वस्यापि तथात्वे प्येषदोष इति वाच्यं। विशिष्टवैशिष्ट्यज्ञान
मन्मते प्रत्यक्षत्वावांतरजन्यप्रत्यक्षवृत्तिजातिविशेषस्य तथात्वोपगमात्‌। अथेश्वरज्ञाने विशिष्टवैशिष्ट्यविषयतानभ्युपगमेननिमित्याहृत्तासैव जन्यताव त्वस्य ॥
च्छेदिकेत्यभ्युपेयते एवमपि जातिविशेषापेक्षया तादृशविषयतायामेवच्छेदकगौरवं दुःपरिहरमेव। विशिष्टवैशिष्ट्यानवगाहिजन्यप्रत्यक्षव्यभिचा
तादृश रवारणाय तादृशजन्यतावच्छेदककोटिप्रवेशः सर्वसंमत एवेति तु नाशंकनीयं। यत्र प्रात्यनिष्ठप्रत्यासत्तिकव्येविषयभेदेन कारणतावादिमते उभ
विष कारतात्मकविषयनिष्ठप्रत्यासत्त्यैव विशेषणतावच्छेदकप्रकारकज्ञानत्वेन हेतुता आदरणीया। तत्र च प्रकारतावच्छेदकताया एव कार्यतावच्छेद
कप्रत्यासन्नित्वस्योपगंतव्यत्वात्‌। निरवच्छिन्नप्रकारताकस्याविशिष्टवैशिष्ट्यानवगाहिज्ञानस्य च प्रकारतावच्छेदकतासंबंधेनानुत्पत्त्यासभिवा
रेण संभवतीति तादृशविषयत्वाविशेषितस्यैव जातिविशेषस्य जन्यतावच्छेदकत्वं संभवतीति। अथास्तु विजातीयप्रत्यक्षत्वमेव विशेषणता

प्र वच्छेदकप्रकारकज्ञानादिजन्यतावच्छेदकं॰ तथाप्यनुमितौ विशेषणतावच्छेदकज्ञानहेतुत्वांतरं न कल्प्यते वह्नित्वादिविशिष्टवैशिष्ट्यावगाहित्वात्

७ पर्वतो वह्निमानित्याद्यनुमितेर्वह्नित्वादिप्रकारज्ञानशून्यकाले परामर्शविरहेणैवापत्त्यसंभवात्॰ परामर्शदशायां वह्नित्वादिप्रकारकज्ञानस्यैवेश्य

7 कत्वादिति चेन्मास्तु पर्वतो वह्निमानित्याद्यनुमितौ वह्नित्वादिप्रकारकज्ञानस्य हेतुत्वांतरं पृथिवीतरभेदवतीत्याद्यनुमितौ तु इतरभेदत्वादिप्रकार

कज्ञानस्य तथात्वं कल्प्यनमावश्यकं॰ अन्यथा इतराप्रकीभूताभावप्रतियोगिपृथिवीत्ववती पृथिवीत्यादिपरामर्शात् स्यातेऽपरेणेतरभेदत्वप्रकार का

कोपस्थितिदशायामिव तच्छून्यकालेऽपि पृथिवीतरभेदवतीत्याद्याकारकानुमित्यापत्तेः तस्मादनुमितित्वस्यावच्छिन्नत्वविरुद्धत्वेन ये [illegible] अनुमितौ

विशेषणतावच्छेदकप्रकारकज्ञानहेतुताकल्पनाधिक्याद्याप्यमते लाघवमनुपणमेवः वस्तुतस्तु अनुमितित्वस्य मानसत्वव्याप्यत्वे विबाधका राम

मावान्मानसं प्रति अनुमितिसामग्री प्रतिबंधकत्वाकल्पनप्रयुक्तलाघवमपि संभवति॰ तथाहि॰ अनुमितित्वस्य मानसत्वव्याप्यत्वे भिन्नविषय ७

वाच्छुत्यादिसामग्रीज्ञातिवच्छेदकतावच्छेदककोटौ अनुमित्यन्यत्वनिवेशप्रयुक्तगौरवमनुपदर्शितं तदेव न। यतो निखिलानुमित्यन्यमानसे तु आत्म

वि त्वमानमभ्युपेयते· एवं च मानसत्व[illegible]स्थले लौकिकविषयिताऽसंबंधेनाऽन्यत्वमेव निवेश्यते· अनुमितौ च आत्मनिरूपितलौकिकविषयित्वा
भावेन न व्यभिचार इति नैव अनुमितित्वस्य त्वनिवेश उपपत्तिः· अथ विशेष्ये सामग्री दशायां पर्वतविषयतानिरूपितवह्निविषयताशालिमानसं जायतामिति
च्छासत्वे वह्नेः पर्वतस्य त्वविषयकत्वे तज्ज्ञानसत्त्वे पूर्वदर्शिततरीत्यानुमानादिमानासंभवात् आत्ममानमपि न संभवति तस्य योग्यविशेषगुणाविनिर्मो
द केनाभावात् तथा चात्मविषयकप्रत्यक्षस्य आत्मत्वविषयकत्वनियमान्नादृशस्थले आत्मत्वाविषयकमेव मानसं भविष्यतीति तदसंग्राहकतया व्यतिरे म
म धिसामग्रीप्रतिबंधकतावच्छेदकत्वमात्मत्वस्योपपद्यत इति· सत्यं· मानसस्यरीयविरोधिसामग्रीप्रतिबंधकतायां इच्छायामुक्तेनैकत्वे तत्र न संभवति वज्ञा
नादीनां भानं न देवन· इच्छायामुक्तेनैकत्वे विषयभेदेन प्रतिबध्यप्रतिबंधकभावानंत्यात्· किं तु विषयित्वविषयत्वोभयसंबंधेनेच्छावच्छिन्नत्वमेवेच्छाधी
नप्रत्यक्षे व्यभिचारवारणाय कार्यतावच्छेदकौ टौ निवेश्यते· भवति हि घमानसं जायतामितीच्छाधीनघटादिगोचरानिखिलमानसं तादृशोभय
संबंधेनेच्छावत् तथाविधमानसाव्यवहिते क्षणे तादृशेच्छायाः नियमतः सत्त्वात् निखिलतथाविधमानसे तादृशेच्छायाः अपि माने बाधकाभावेन तद्विषयि

ये२४

८ तायास्तद्भिन्नतायाश्च तत्र सत्त्वात् । विषयतानिवेशात् सद्माननसेच्छाविजनकघटादिमानसस्य संग्रहः । निखिलज्ञानानामेव मानसानां विषयतासंबंधेन कालो-
त्तरोत्पत्तौ च तया तेषु सर्वविषयतासंबंधेनेच्छावदन्यमानसाप्रसिद्धिरतो विषयविनाप्रवेशः । एवं चोपदर्शितस्य लौकिकप्रत्ययतो वह्निमानित्यादिमानसे च व्याप्य-
त्वादिना ज्ञानादिभानेऽबाधकाभावः तथा सत्यपि तद्वोपदर्शितोभयसंबंधेनेच्छावत्त्वस्याकृततया विरोधिसामग्र्यभावहेतुतायां व्यभिचाराप्रसिद्धेरिति ।
तद्वोपदर्शितोभयसंबंधेनेच्छावदन्यत्वस्य कार्यतावच्छेदकत्वे इच्छां विनापि विरोधिसामग्रीकाले मानसत्वरूपसामान्यधर्मावच्छिन्नापत्तिः इच्छा-
कालीनफलस्य विरोधिसामग्र्यभावजन्यतावच्छेदकानाक्रांततया तदुत्पादकप्रयोजकसामग्र्याः इच्छाशून्यकालेऽपि अकृततत्त्वादिति वाच्यं । इच्छाधीनमा-
नसस्येच्छाविषयकतया तत्र विषयविधया इच्छाया अपि हेतुतायाः क्लृप्तत्वात् तदुत्पादप्रयोजिकाया इच्छाघटितसामग्र्या इच्छाशून्यकालेऽसत्त्वात् । राम
अथ प्रत्यक्षं प्रति विषयस्य विषयत्वेनैव हेतुत्वं क्लृप्तं न तु इच्छात्वादिना । एवं चेच्छात्वावच्छिन्नस्यासत्त्वेऽपि विषयत्वरूपकारणतावच्छेदकावच्छिन्नस्य सत्त्वा- ८
त् इच्छाशून्यकालेऽपि मानससामग्र्यकृततैव । अस्तु वेच्छाप्रत्यक्षत्वावच्छिन्नं प्रति इच्छात्वादिना हेतुत्वं क्लृप्तं तथापि चाक्षुषादिगोचरेच्छाकाले घटादिमानसे

[illegible] तथा

पा ॥ च्छाकालेऽपरादिज्ञानासत्त्वेबाधरादिमानसापत्तिर्दुर्वारैव। इच्छात्वावच्छिन्नस्य तत्र सत्त्वेन इष्टहितसामग्र्या अप्यक्षत्वादिति चेन्न। मा भूत् तत्कृत्यहेतुताद
शापत्तिवारणाय घटमानसेच्छाविषयकप्रत्यक्षत्वावच्छिन्नं प्रति घटमानसेच्छात्वादिना हेतुताकल्पनेऽपि तत्त्वेव वारयितुमशक्यते। न चैवं विषयभेदेनेच्छायाः सामग्र्य
भावहेतुत्वांतरस्य कल्पनापत्तिरिति स्ये तदपेक्षया विषयभेदेनेच्छाविरहविशिष्टसामग्र्यभावहेतुत्वकल्पनमेवोचितमिति वाच्यं। इच्छायाः उत्तेजकत्वे
नंतसामग्र्यभावानां विषयभेदेन हेतुतावृद्धेः तदपेक्षयाऽऽइच्छाया एव विषयभेदेन हेतुतायाः सामग्र्यभावानां च निविष्टमानससाधारणतया विषयभा नहेतु
नप्रतिबंधकबाधादिदशायां विषयस्य तथाभानासंभवेनेच्छाभानमपि न संभवतीति तदानीमिच्छाऽविषयस्य संभवात्तत्र व्यभिचारेणेच्छा[illegible]वदस्मत्त्व
स्यकार्यतावच्छेदककोटौ निवेशकल्प्योऽसाधीयान्। इति तदसत्। निर्द्धर्मितावच्छेदकज्ञानस्य बाधबुद्ध्यप्रतिबध्यतया तादृशबाधकालेऽपि विषयांशे
निर्द्धर्मितावच्छेदकेच्छाभाने बाधकाभावात्। तथा चेच्छावदन्यत्वस्य कार्यतावच्छेदकत्वे बाधकाभावादुपदर्शितस्थले ज्ञानादीनां भाने बाधकाभावान्न व्यभि ले
चारात्मत्वस्य विरोधिसामग्र्यभावजन्यतावच्छेदककोटिप्रवेशानंतर्थकामिनीजिज्ञासाकालीनकामिनीमानसे आत्मभानं न संभवति कामिनीभिन्नज्ञानका
॥ नहेतुतायाः कल्पनमेवोचितमित्यपकृष्टः इच्छादीनां विषयोपधानेनैव मानसत्वं भवति इत्यंशे विशेष ए ५

मिनीजिज्ञासायाविरोधित्वात्· अतस्तदसंग्राहकतयाआत्मत्वस्यविरोधिसामग्र्यभावजन्यतावच्छेदकत्वंनसंभवति· नचतादृशमानसस्यविरोधिसाम
९ ग्र्यभावजन्यतावच्छेदकानाक्रांतत्वेविद्यातिविरुद्धः तन्नेच्छायाहेतुत्वेनेच्छांविनाविरोधिसामग्रीकालेतदापत्त्यभावादितिवाच्यं· इच्छाविषयकप्रत्यक्ष
एवेच्छायाहेतुत्वेनतत्रअनुव्यवसायात्मकइच्छायाअविभानासंभवेनेतत्रेच्छायाअतथात्वादितिचेत्न· कामिनीजिज्ञासायाकामिनीभिन्नविषयकज्ञानत्वंन
१ प्रतिबध्यतावच्छेदकंकामिनीत्वेतादृशज्ञानव्यापिकामिनीभिन्नकामिनीत्वतत्संबंधादिविषयकतयातादृशज्ञानव्यापिकामिनीजिज्ञासादशायांअनु
दयप्रसंगात्· रूपविशिष्टकामिनीज्ञानंजायतांइत्येतादृशेच्छाकालेरूपवतीकामिनीत्येतादृशज्ञानानुदयप्रसंगश्च· किंतुकामिनीविषयित्वाभावव
न्निविषयितावज्ज्ञानत्वमेवतथा· साक्षात्परंपरयाकामिनीविषयविषयितानिरूपितायाविषयितासावनकामिनीविषयित्वाभाववद्वृत्तिः अतःकामिनीरूपव राम ९
तीत्यादिज्ञानीयरूपादिविषयितायाअतथात्वान्नतादृशज्ञानानुपपत्तिः इत्थंचकामिनीजिज्ञासाकालेकामिनीमहंजानामीत्याकारककामिनीविषयि
त्वाभाववद्दृत्तिआत्मत्वादिविषयताशालिनोत्पन्नेबाधकाभावः आत्मत्वादेःप्रागनुपस्थितौकामिनीमहंजानामीत्याकारकज्ञानंनसंभवतीतिविशिष्टबुद्धे

विशेषणाधियो हेतुत्वात्· परंतु तदात्मत्वांशे निर्विकल्पकमेव मानसमुत्पद्यते तच्च कामिनीजिज्ञासाप्रतिबध्यमेव· आत्मत्वनिरूपितनिर्विकल्पकोप
विषयितायाः कामिन्यविषयक ज्ञानसाधारण्यमिति तु नाशंकनीयं आत्मत्वविशिष्टबुद्धौ विशेषणज्ञानहेतुत्वे मानाभावात्· प्रथमत एवो रूपविशिष्टबुद्धि
संभवात्· कामिनीविषयित्वाभाववद्वृत्तिविषयितायाः कामिनीजिज्ञासाप्रतिबध्यतावच्छेदकत्वे कामिनीजि[redacted]ज्ञासादशायां अंतरेलोव
रूपविशिष्टकामिनीज्ञानं जायतामित्याद्याकारिकामिच्छां रूपवतीकामिनीजिज्ञासापत्तिः तथाविधज्ञाने रूपविशिष्टकामिनीज्ञानं जायतामित्येतादृ
शेच्छाविरहविशिष्टकामिनीजिज्ञासात्वादिना प्रतिबंधकत्वात् तस्करत्यनोभयवादिसमाधेयैवेति कुसुमप्रनेतरईविनश्यत्स्वस्य सन्निकर्षजन्यत्वस्यादिनिर्विक
स्यात् उपनीतभानं तु नरप्रामाणिकमेवेति न तदसंग्राहकत्वं तथा आत्मत्वस्य विशेषिसामग्रीप्रतिबध्यतावच्छेदकत्वमुपपद्यते इति कश्चित् कार्यानवकाशः।
यत्तु अनुमितिस्थले निखिलमानसे आत्मत्वस्यैव ज्ञानत्वव्याप्यविधानसंभवात् लौकिकविषयतासंबंधेनात्मत्वं ज्ञानत्वं वा विशेषिसामग्रीप्रतिबध्यताव
च्छेदकं इत्यत्र विनिगमनाविरह इति· तदपि न· क्वचित् साक्षात्कारपूर्वं नियमतो ज्ञानासत्त्वात्· तज्ज्ञानत्वाविषयकस्यापि क्वचिन्मानसस्य संभवात्· तदसंग्रा

हकतया ज्ञानत्वस्य तथात्वासंभवात् न च कृतिसाध्यताकारस्य चीषयीश्रे उपनीतभानात्मकतया उपनीतमानससत्ताया आवश्यकत्वान्निखिलमानसे
ष्वेव ज्ञानत्वमानं संभवतीति वाच्यं · इच्छाकृत्योरुपनायकत्वोपगमात् विनैवोपनायकं शं ज्ञानं उपनीतमानसंभवात् । विवेचितं चेदमधिकमन्यत्र · एवं विशि
ष्टवैशिष्ट्यबोधं प्रति इच्छाकृतिसाधारणविशेषणतावच्छेदकप्रकारकत्वेन संस्कारस्याहेतुत्वे तथाविज्ञानीयगुणत्वेन वा हेतुत्वात् । कृतिमानसस्य विशिष्टवै
शिष्ट्यबोधरूपत्वेपि न नियमतो विशेषणतावच्छेदकप्रकारकज्ञानापेक्षा · अस्मकवा कृतिमानसस्य नियमेन ज्ञानादिविषयत्वे · तथापि सुखादिमानसे न तत्रिय
मः पूर्वं नियमतो ज्ञानसत्वे मानाभावात् इति न किंचिदेतत् अधाकृ एतावता प्रयासेनानुमित्यन्यत्वनिवेशप्रयुक्तगौरवपरिहारः तथापि मन्माप्यमते लाघवा
संभवः । वक्ष्यमाणानुमित्यादिकाले घटादिमानसवारणाय अनुमितिसामग्र्यामानसं प्रति बंधकत्वकल्पनाया उभयवादिसिद्धत्वात् · नहि भिन्नविषयकमान
से तत्प्रतिबंधकताया उभयमतसिद्धत्वे विभाप्यमते समानविषयकस्थलीयप्रतिबंधकत्वाकल्पने न लाघवमिति दूरानीयमनुशाकातेः यतः स्वयमेव मानसे
विरोधिसामग्र्याः प्रातिवध्यप्रतिबंधकभावभेदाभावो दर्शितः इति चेन्न · अनुमितिसामग्री दशायां मन्माप्यमते भिन्नविषयकमपि मानसमुत्पद्यते तावता

२ त्वतिविरहात्॥ एवं च व्याप्तानभ्युपगमे प्रत्यनुमितिसामग्र्याः प्रतिबन्धकत्वाकल्पनेऽपि फलालाघवमलमेव न च व्यवहाराद्यनुमितिसामग्रीदशायां उदासी
नघटादिमानसोपगमेतद्दुन्नरे घटं जानामीत्याकारकानुव्यवसायापत्तिरिति वाच्यं॥ अनुमितिवृत्तिविषयतासंबंधेन तादृशानुव्यवसा
यं प्रति विधेयोद्देश्यपादिविधया घटादिविषयताः विशेषत्वानि रूपकज्ञाननिरूपितघटादिविषयतात्वेनानुमव्यापकतादृशविष
यतानिरूपकत्वेन व्यवसायस्यतादात्म्येन सामग्र्या हेतुत्वोपगमात् तादृशानुमितेश्चतथाविधघटादिविषयताऽनिरूपकत
यातादृशानुव्यवसायापत्त्यसंभवात्॥ अनुमित्यवृत्तिविषयताऽनुमितिभिन्नज्ञाने च्यनुव्यवसायस्योत्पत्तेस्तत्र सामान्य
विषयतासंबंधेन तथाविधानुव्यवसायापत्तिर्दुर्वारैवेति तु नाशंकनीयं यतोऽनुमितिभिन्नवृत्तिविषयतासंबंधेनानुव्यवसा
यं प्रति अनुमितिभेदस्यहेतुत्वोपगमे कल्पने एवं चानुमितिविषयतातदन्यवृत्तिविषयताऽन्यतरसंबंधेनानुव्यवसायोत्पादक
सामग्रीसहकारेणैव सामान्यविषयतासंबंधेन कार्योत्पादकसामग्र्याः कार्योत्पादप्रयोजकतास्॥ प्रकृते चानुमितौ तादृशान्यत
रसंबंधेन कार्योत्पादकसामग्र्याः असत्वान्नापत्तिरिति॥ अयपानिरिति मानसे बाधत्वभानसंभवे मानसत्वजातिरेवाप्रामाणि

क्रीतत्वप्रकारकानीयप्रयोजनस्याप्यत्वेनैवोपपादयितुं शक्यत्वात् ॥ एवं च मानसत्वावच्छिन्नं प्रतिविशेष्यताख्यसामग्र्याः प्रतिबन्धकत्वकल्पनेति
ऽभिमतं यदि मतेऽपि नास्ति इति चेन्न्यास्यान्यमानसं लौकिकं जायते । प्रामाण्यग्रहकाले एवं सामग्र्या मानसत्वं प्रति च प्रतिबन्धकतावच्छेदकीकृतस्यमानसस्य फले प्रतिबन्धक
ताकल्पने मानसप्रत्यक्षमेव जन्यतां प्रत्यक्षसामग्र्या बलवत्त्वात् । अस्य तत्रानुमितिः इति सामग्र्यां घटमहं जानामीत्येतादृशप्रत्यक्षत्वावच्छि
न्नमुत्पद्यते तादृशसामग्र्याः सत्तामप्यनुमितिसामग्र्यां सत्यामपि तदुत्पत्तेः तदवच्छिन्नाप्रत्ये रतः मिति तल्लिङ्गविकारपितृमतानयसकादिरिति ।
विरुद्धमते तादृशनादिलौकिकमनस्त्वलौकिकप्रत्यक्षकाले तदनुमित्युत्पत्तिवारणाय एतत्तादृशालौकिकप्रत्यक्षसामग्र्याः प्रतिबन्धकत्व
कल्पनमधिकं प्राप्यते तदानीमनुमितिस्वीकारे तत्प्रतिबन्धकत्वं न तत्कल्पनमिति लाघवं ॥ न च तदानीमनुमितिस्वीकारे तदनेन तदं
ज्ञानमनुमिनोमीत्याकारकानुव्यवसायापत्तिरिति वाच्यं ॥ मानसप्रत्यनुव्यवसायं प्रति तादृशानिरूपितलौकिकविषयताप्रत्य
 तिबन्धकत्वोपगमादित्यपि केचित् कविन्मानसादिकं प्रत्यनुमितिसामग्र्याः प्रतिबन्धकत्वकल्पनेऽनाधिकं मितिविषयकत्वादुपा
दित्यलीयप्रतिबन्धकतयैवोपपत्तेः ॥ पाठ ॥ सामग्री प्रतिबन्धकतापां चेदिष्ठापादनेऽजन्यत्वं सीक्रियते तदेव चाक्षुषत्वादिसकारके प्र

१९

नो विशिष्टो नैजनकत्वानुरोधात् चाक्षुषत्वादीनां विशिष्य प्रतिबध्यतावच्छेदकत्वमापद्येतेति चाक्षुषत्वादिस्थलीयप्रतिबन्धकतामानोपपत्तिः
सामान्ये देवने घ्राणाद्युत्पन्नजनकत्वस्यौकारस्यानिष्पापो जनकत्वात् ॥ न हि द्रव्यघ्राणजनकत्वानवच्छिन्नमेऽनुमित्यादिसामग्रीकालेऽपि चाक्षुषेऽपि घ्रा
णत्वेऽपि चाक्षुषाद्यनुत्पत्तिरिति तदंशे पतः सामग्र्याः सिद्धाभावादिविशिष्टपरामर्शत्वादिना प्रतिबन्धकतां कल्पितुं लाघवाद्
व्यवहितपूर्वक्षणवृत्तित्वसंबन्धेनानुमित्यादिमत्ते नैव यदा चाक्षुषादिगोचरेच्छाविशिष्टचाक्षुषादिसामग्री तदुत्तरक्षणे चाक्षुषं
नुमित्यनुदयाद् व्यवहितपूर्वक्षणवृत्तित्वसंबन्धेनानुमितिमत्तावच्छिन्नेनाक्षतिरिति चेन्न घ्राणाद्युत्पन्नजनकत्वं तत्र चाक्षुषाद्युपपत्तिः ॥
वे च चाक्षुषादिस्थलीयप्रतिबन्धकतायाः सर्वसाधारण्यस्यानुमित्सान्वतानतादेर् प्रतिबध्यतावच्छेदकत्वं संभवतीति नमानत्सस्थले
प्रतिबन्धकत्वकल्पनापाद्याधिकमित्याशंकानेत ॥ नदतंगमर्त्रं ॥ द्रव्यघ्राणानुत्पन्नजनकते घटचाक्षुषेच्छाविशिष्टतत्सामग्रीदशा
यां प्रत्यक्षानुमितिसामग्रीसत्वेऽनुमित्सापत्तिस्त्वाद्याक्षुषाद्युत्पादयोः परस्परस्थीनत्वापातत्वान्तत्त्वापत्तेः स्तंगारः ॥ तथाहि तुल्यपुष्पा
मिन्नाविषयकानुमित्यादिके सत्यपीच्छाविशिष्टचाक्षुषादिसामग्र्याजन्यचाक्षुषादिमत्तेनप्रतिबन्धकतानाच्चा ॥ एवं च सत्तास्थले च

सुखादिकमनुमीयत इति चेन्नाहं शरीरप्रतिबंधकतासंभवध्यानेनानोऽनुमीयतेऽनुमित्यादिकमत त्वदनुमानादिस्यादुद्बोधाप्युत्पादाद्धानएव माद्दृशां घुत्वादे
च्यानुमितत्वनुत्पादाद्धानएवेति ॥ अनुमित्युत्पादे उक्तप्रतिबंधकसत्त्वे न चाद्दृबोधोत्पादासंभवादिति ॥ इच्छापायुक्ते उक्ते चेतरानीचाद्दृबोधप्युत्पा
दो नानुमित्यनुत्पादाद्धानं तत्र तु व्यतावपीच्छा स्पोत्तेजकसत्त्वे न चाद्दृबोधप्युत्पादसंभवात्कथमनुत्पादात् ॥ किं त्विच्छाधीनाद्दोषेति नामोनाप्रपञ्च
क्रिदिति इच्छायाउत्तेजकत्वमावश्यकमेवमनुत्तेजकानुमित्यादिमतेन प्रतिबंधकतमेवासंभवयुक्तिकम व्यवहितपूर्वक्षणोत्पन्नत्वेन संबंधेनानु
मित्यादिमतः परामर्शादेरनुमित्युत्पादक्षणेऽप्यसत्त्वेन तदुत्तरमनुमित्यनुत्पत्तिसामानाधिकरण्यापत्तेः ॥ अत आनुमित्युत्तरक्षणे अनुमित
व्यवहितपूर्वक्षणसत्त्वे न तत्क्षणोत्पन्नसंबंधेनानुमितिविशिष्टप्रसत्त्वेन विशिष्टाभावः फलमेवेति ॥ नानुपपत्तिरितिचेन्नाहं तत्सं
बंधेनानुमितिविशिष्टत्वं तस्य ह्येवक्षणोत्पन्नवर्त्तते तदानीं विशेषणत्वेऽतापि अनुमित्युत्तरसत्त्वादिति ता ह्यपाविशिष्टात्यधिकरणत
मेवास्ति ॥ अव्यवहितोत्तरक्षणोत्पत्तिकानुमितित्वसंबंधेन प्रतिबंधकत्वमित्यस्याप्युक्तपालसमानुगतत्वाच्च निर्वक्तुमशक्यत्वा
दानुमेयदेवमेवेत्यलमसज्जल्पनयेति ॥ इदं पुनः सिद्धान्तानुमानादिरूपा सद्रसाः कुत्रचिदपवि वेकोऽपि सामग्रीप्रतिबंधकताया मिच्छायाः ३

त्ते जनकत्वस्योपगम्यते विषयादिभेदेन प्रतिबध्यकताभेदापत्तेः किं तु इच्छाध्यानज्ञाने व्यभिचारवारणाय स्वविषयत्वसंबन्धेन स्मृतिमत्व
स्वसामानाधिकरण्येतत्रितयसंबंधेनेच्छावदन्यत्वं कार्य्यतावच्छेदककोटौ निवेश्यते भवति च घटचाक्षुषं जायतामित्याकारकेच्छाध्यान
घटचाक्षुषादिकं तादृशत्रितयसंबंधेनेच्छाविशिष्टमतो न तत्र विरोधिसामग्र्यभावहेतुतायां व्यभिचारः स्पार्शनादिगोचरे
च्छाव्यवहितोत्तरक्षणे स्मार्तिकस्य चाक्षुषादेः संग्रहाय संबंधघटकस्वविषयतासमवेतत्वांशः इच्छानाशानन्तरं तत्क्षणोत्पन्नस्य संग्रहाय
द्वितीयदलप्रवेशः इत्यतः स्ववृत्तित्वं स्मृतिमत्वं च कालिकसंबंधेनेच्छानाशोत्तरं जायमाने चैत्रीयेच्छावृत्ति स्मृतिमत्वं स्वोत्तरद्वितीय न
क्षणसमानावस्थापितयात्राधिकरणे तादृशचाक्षुषे रे भावात् ॥ एतदुपलक्षणं स्वस्मरेव च कालिकसंबंधेनाधाराधेयसंबंधसंभवात्
एकदेशोपचाक्षुषादिगोचरेच्छाव्यवहितोत्तरोत्पन्नतच्चाक्षुषपुरुषान्तरीयचाक्षुषादिसंग्रहाय तीयदलप्रवेशः न चावि
रोधिसामग्रीकालेच्छासत्त्वे तादृशसामग्रीबलाच्चाक्षुषादिकमुत्पद्यते इच्छाक्षणकालेपि तादृशसामग्रीवर्त्तते इत्याशंकनीय
इच्छाकालीनचाक्षुषादेरिच्छायाजनकत्वोपगमात् एवं च चाक्षुषादि स्यातेरनुमितिसामग्र्याः प्रतिबध्यकतावच्छेदकेन चाक्षुषत्वा

द्विक सपि तु मानसमाधारणानुमितत्वन्यमानसत्वमेवेति न मानसस्थलेऽपि तु मते पानुमितिसामग्री प्रतिबन्धकत्वं कल्पनाधिकं गौरवा
१२ नुमितिसामग्र्याः चाक्षुषादिस्थलीयप्रतिबन्धकतावच्छेदककोटौ भिन्नविषयकत्वमवश्यं निवेशनीयमन्यथा समानविषयकलौकिक
चाक्षुषादौ व्यभिचारप्रसंगात् ॥ एवं च ताद्दृशप्रतिबन्धकतायामनुमितिसामग्रीकाले समानविषयकमानसं दुर्वारमिति चे
न्न भिन्नविषयकचाक्षुषादिस्थलीयप्रतिबन्धकतायां समानविषयकमानसत्वमभावस्य निवेशसंभवेऽपि समानविषयकचाक्षुषाद्युप
नीतभानानुरोधेनानुमितिसामग्र्यास्तत्र प्रतिबन्धकत्वावारकत्वस्यावश्यकत्वात्तत्रैव लौकिकान्यप्रत्यक्षत्वं समानस
माधारणं स्वप्रतिबन्ध्यतावच्छेदकत्वोपगमे नानुमितिसामग्रीकाले ताद्दृशमानसस्य वारणसंभवात् ॥ परे तु कामनुमितित
स्यप्रत्यक्षत्वविरहितत्वेऽनुमितिस्थले विशेषणतावच्छेदकप्रकारकज्ञानस्य कारणताधिकं मितिः ॥ तदप्यकिंचित्करं ॥
नित्यसाधारणधर्मस्य कार्यतावच्छेदकत्वे लाघवविरहेण ज्ञानत्वस्यैव तज्जन्यतावच्छेदकत्वसंभवात् ॥ मत्प्रत्यक्षस्थलीयकार्यैक्या
रणभावेनैव गौरवात् ॥ वस्तुतस्तु ॥ अनुमितेर्विशेषणतावच्छेदकप्रकारकज्ञानजन्यतावच्छेदकानां क्षांतत्वेऽपि न हानिः ॥ इत १२

रव्याप्यत्वावच्छिन्नताभावप्रतियोगिपृथिवीत्ववती पृथिवीत्याकारकपरामर्शादस्मात्पा अन्वयव्याप्तस्य ग्राहिपरामर्शरूपकारणविरहे पृथिवी
तरभेदवतीत्याकारकविशिष्टवैशिष्ट्यावगाह्यनुमितेरापादयितुमशक्यत्वात् न च तादृशपरामर्शं विनापि स्वातन्त्र्येणेतरभेदत्वप्रका
रकज्ञानदशायां व्यतिरेकिपरामर्शाद्विशिष्टवैशिष्ट्यबोधात्मिकानुमितेरसंभवात् तादृशपरामर्शविरहोऽकिंचित्कर इति वाच्यं न
तन्नो केवलविशेष्यविशेषणसंबन्धविषयत्वेन पृथिवीतरभेदवतीत्याकारकानुमितेरुपगमात् ॥ एवं सति इतरभेदत्वप्रकारकज्ञान
शून्यकाले व्यतिरेकिपरामर्शात् पृथिवीतरभेदवतीत्याकारिकायां केवलं विशेष्यविशेषणसंबन्धविषयिण्यामनुमितेरसंभवः तत्तेन
तत्स्थले एव तथाविधानुमितेः स्वीकारात् । अनुमितिस्थले च विशेषणज्ञानस्यापि हेतुतायामलं ममत्वात् तद्विरहस्यापि कंचि
त्करत्वादिति चेन्न मनोनियतताज्ञानादिरूपतादृशानुमितिः । तथैवं साध्यविशेष्यकानुमितिर्विलीनेति चेद्विलीयतां किं प्रयोजनमप्रचपः ॥ एवं च
लाघवविरहादनुमितित्वस्य जात्यन्तरत्वं व्याप्यत्वे साधकविरहः बाधकाभावादिकार्यतावच्छेदककोटिप्रवेशेनानुमितिसाधारण्ये
पत्वेऽहितज्ञानविशेष्यत्वं तद्वृत्तिस्वसमानरूपबाधकजातीयसंस्कारप्रयोजकतावच्छेदकत्वादिति प्रत्यक्षत्वपरोक्षत्वपर्यनुमि

अनु॰ प्रामा॰ वा॰ तो समावेशः। अनुमितित्वावच्छिन्नानुमितिसामग्रीप्रतिबध्यतावच्छेदकतया सिद्धे नानुमितित्वव्याप्तज्ञानवृत्तिजातिविशेषेण संकरप्र

१५ संगात्। प्रत्येकं तज्जातिरेव सामग्रीकार्यतावच्छेदिकेति चेत् तर्हि अनुमितित्वव्याप्तज्ञानवृत्तिजात्या संकरप्रसंगेन नैवानुमितित्वस्य प्रत्यक्षत्वव्या

प्यतानुपपत्तिरिति वाच्यं। नानाजातिः स्यादेको धर्मः स्मरणादौ तत्र च प्रत्यक्षत्वं तत्रानुमितौ तस्मात् तत्र न सा जातिः आहत्य पादैरेतु

रूपोः समावेशादिति तस्मादनुमितेः प्रत्यक्षत्वविलक्षणत्वं निष्प्रत्यूहमेवेति सिद्धमनुमानस्य पृथक्प्रमाणत्वमिति॥

इतिश्री अनुमानसामान्यस्य स्थापनं॥ ॥ छ॥ ॥ ॥ छ॥ ॥छ॥ ॥ छ॥ ॥ छ॥

१५

नम्बर १२६६ पत्रे · २४

अनुमानप्रामाण्य

स्थापन बाबा ३५२